# नीतिशतकम्

**दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।**
**स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ।।१।।**

**अन्वयः (Prose Order)–** दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये स्वानुभूत्यैकमानाय शान्ताय तेजसे नमः ।।१।।

**संस्कृतसरलार्थः–** दिक्कालाद्यवच्छेदकपदार्थैरपरिक्लृप्ताय अत एव अपरिमिताय ज्ञानघनमूर्तये स्वानुभूत्यैकगम्याय तेजोमूर्तये ब्रह्मणे नमोऽस्तु ।।१।।

**हिन्दी–** दिशा और काल से अनवच्छिन्न अर्थात् परिमित न किये गये, अनन्त, चैतन्यस्वरूप, स्वानुभूत्यैकगम्य ज्योतिःस्वरूप ब्रह्म को नमस्कार है ।।१।।

**English Translation–** A bow to that Deity who is beyond the measures of Time and Space, who is formless and whose only form in infinite Consciousness, who is beyond the three attributes of Matter, still whose very self is three properties. (1)

**यां चिन्तयामि सततं, मयि सा विरक्ता,**
**साऽप्यन्यमिच्छति जनं, स जनोऽन्यसक्तः ।**
**अस्मत्कृते च परितप्यति काचिदन्या,**
**धिक् तां च, तं च, मदनं च, इमां च, मां च ।।२।।**

**अन्वयः (Prose Order)–** यां सततं चिन्तयामि सा मयि विरक्ता, साप्यन्यं जनमिच्छति, स जनोऽन्यसक्तः । अस्मत् कृते च काचिदन्या परितप्यति । ताञ्च तञ्च मदनञ्चेमाञ्च माञ्च धिक् ।।२।।

**संस्कृतसरलार्थः–** अहं यां कान्तां रात्रिन्दिवं चिन्तयामि, तस्या मयि लेशेनापि रागः न वर्तते । साऽपि मद्व्यतिरिक्तं कमपि जनं कामयते, यो हि तया काम्यते, सः जनः अन्यस्यां तदतिरिक्तायां कस्यांचित् सक्तः वर्तते । मयि अपि काचिदन्या स्त्री अनुरक्ता वर्तते यस्यां मम् अनुरागराहित्यमस्ति । अत एव मद्वाञ्छितां तां तया वाञ्छितं तं जनं, कामदेवं, मदनुरक्तां इमां, माञ्च धिक्कारोऽस्ति ।।२।।

**हिन्दी–** जिस स्त्री का मैं अहो-रात्र चिन्तन करता हूँ, वह मुझसे विमुख है। वह भी दूसरे पुरुष को चाहती है। उसका अभीष्ट वह पुरुष भी किसी अन्य स्त्री पर आसक्त है। तथा मेरे लिये कोई अन्य स्त्री अनुरक्त है। अत: उस स्त्री को, उस पुरुष को, कामदेव को, मेरे में अनुरक्त इस स्त्री को तथा मुझे धिक्कार है ॥२॥

**English Translation–** She, whom I Contemplate, is always indifferent to me. She too wants another (for her) and he in turn is attached to another woman. An another woman is carveing for my love. Fie upon that woman, that man, upon cupid, this woman and also upon myself. (2)

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं ब्रह्माऽपि तं नरं न रञ्जयति ॥३॥**

**अन्वय: (Prose Order)–** अज्ञ: सुखमाराध्य: विशेषज्ञ: सुखतरम् आराध्यते, ज्ञानलवदुर्विदग्धं तन्नरं ब्रह्मापि न रञ्जयति ॥३॥

**संस्कृतसरलार्थ:–** यो हि किमपि न जानाति स सुखेन आराधयितुं शक्य:। यस्तु विशेषज्ञ: तत्त्ववेत्ता मूर्खापेक्षया अत्यन्तानायासेन आराध्यते। यत: स विद्याबलेन कृत्याकृत्यं विविच्य विद्वांसो विद्वांसं शीघ्रमेव प्रसादयितुं शक्नुवन्ति। किन्तु स्वल्पेनैव ज्ञानेन गर्वितमानसं पण्डितमानिनं नरं पितामहो ब्रह्माऽपि प्रसादयितुं न शक्नोति। तन्मनस: सूक्तिसहस्रैरपि समाधानासंभवादिति ॥३॥

**हिन्दी–** जो कुछ न जानता हो, अर्थात् मूर्ख को सरलता से प्रसन्न किया जा सकता है। बहुत जानने वाला अर्थात् विशेषज्ञ को तो अनायास प्रसन्न किया जा सकता है। परन्तु ज्ञान के लेशमात्र को पाकर दुर्विदग्ध हुए मनुष्य को ब्रह्मा भी प्रसन्न नहीं कर सकता, मनुष्य की तो बात ही क्या है ॥३॥

**English Translation–** An idiot can easily be pleased and one who knows much can be pleased with still greater ease. Even the creator cannot satisfy a man who is possessed of only a smattering of knowledge but prides himself on it. (3)

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरात्[1]

समुद्रमपि संतरेत्[2] प्रचलदूर्मिमालाऽऽकुलम् ।

भुजङ्गमपि कोपितं शिरसि पुष्पवद् धारयेन्

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।४।।

**अन्वय: (Prose Order)–** मकरवक्त्रदंष्ट्रांकुरात् प्रसह्य मणिमुद्धरेत् । प्रचलदूर्मिमालाकुलं समुद्रमपि संतरेत्, कोपितमपि भुजङ्गं शिरसि पुष्पवद्धारयेत् । प्रतिनिविष्टमूर्खजनचित्तं तु नाराधयेत् ।।४।।

**संस्कृतसरलार्थः–** मनुष्य: स्वबलेन नक्रस्य दंष्ट्रान्तरालात् लग्नं रत्नं दुरूद्धरमपि उद्धर्तुं शक्नुयात् । उल्लोलकल्लोलोज्जृम्भितं महार्णवमपि केनचित्लवनसाधनेन सम्यक्तरितुं शक्नुयात् । संजातकोपमपि सर्पं पुष्पमाल्यमिव शिरसि धारयितुं शक्नुयात् । एतत् सर्वमतिदुष्करं कार्यकलापं प्रयत्नवान्नरः सम्पादयितुं शक्नुयात् परं साग्रहो यो मूर्खजन: तस्य चित्तं समाधातुं न पारयेत् ।।४।।

**हिन्दी–** मगर के मुँह की डाढ़ के अग्रभाग से रत्न को चाहे मनुष्य बलपूर्वक निकाल ले और चाहे उत्तुंगतरङ्गों से संकुलित समुद्र को भी पार कर ले और चाहे क्रोधित सर्प को पुष्पमाला की तरह शिर पर धारण कर ले, परन्तु हठी मूर्ख मनुष्य के चित्त को वह संतुष्ट कभी नहीं कर सकता ।।४।।

**English Translation–** A man may be able to take a Jewel out from the teeth of a crocodile and he may also be able to cross the vast ocean agitated by the rows of rolling waves, a man may also be able to place an infuriated snake like a flower on his head but no body can be able to please the imperious heart of a fool. (4)

लभेत सिकतासु तैलमपि यत्नतः पीडयन्

पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।

कदाचिदपि पर्यटञ्छशविषाणमासादयेत्

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।५।।

**अन्वय: (Prose Order)–** यत्नत: पीडयन् सिकतास्वपि तैलं लभेत । पिपासार्दितश्च मृगतृष्णिकासु सलिलं पिबेत् । पर्यटन् कदाचित् शशविषाणमपि आसादयेत् प्रतिनिविष्टमूर्खजनचित्तन्तु नाराधयेत् ।।५।।

**संस्कृतसरलार्थः–** कश्चित् मनुष्यः प्रयासात् चूर्णयन् केनचिद्यन्त्रेण संमर्दयन् बालुकायामपि तैलं प्राप्नुयात्। तृषया पीडितो जनः मरूमरीचिकास्वपि सलिलं पिबेत्। इतस्ततः भ्रमन् जनः समयविशेषे शशस्य शृङ्गमपि लभेत। किन्तु मिथ्याग्रहवतः मूर्खस्य चित्तं समाधातुं न शक्नुयात् ॥५॥

**हिन्दी–** यत्नपूर्वक मनुष्य कदाचित् बालू से भी तेल निकाल ले, पर्यटन करता हुआ मनुष्य शायद कभी खरगोश के सींग पा ले, मृगमरीचिकाओं में चाहे प्यास से व्याकुल व्यक्ति जल प्राप्त कर ले, परन्तु हठी मूर्ख के चित्त को कोई भी प्रसन्न नहीं कर सकता ॥५॥

**English Translantion–** Pressing hard, a man may obtain oil from sands, a wanderer, some how or other, may come by a horn of a rabbit, one may be able to quench his thurst with the waters of a mirage, but nobody can satisfy the heart of a haughty fool. (5)

**व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते**
**[1]छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते ।**
**माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते**
**[2]नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः ॥६॥**

**अन्वयः (Prose Order)–** असौ बालमृणालतन्तुभिः व्यालं रोद्धुं समुज्जृम्भते। शिरीषकुसुमप्रान्तेन वज्रमणीन् छेत्तुं सन्नह्यते, मधुबिन्दुना क्षाराम्बुधेः माधुर्यं रचयितुमीहते यः खलान् सुधास्यन्दिभिः सूक्तैः सतां पथि नेतुं वाञ्छति ॥६॥

**संस्कृतसरलार्थः–** यो मनुष्यः दुष्टान् मधुरैः सुवचनैः सज्जनमार्गे नेतुमिच्छति, मन्ये सः कोमलबिसकिसलयसूत्रैः व्यालं नियन्तुं कृतप्रयत्नो भवति। कोमलशिरीष-पुष्पस्याञ्चलेन हीराख्यमणिविशेषं विदारयितुं वाञ्छति तथा मधुलवेन लवणार्णवस्य माधुर्यं रचयितुं वाञ्छति ॥६॥

**हिन्दी–** जो मनुष्य सरल सूक्तियों से दुष्टों को सन्मार्ग पर लाना चाहता है, मानो वह मनुष्य कोमल-कमल तन्तुओं से दुष्ट हाथी को बाँधना चाहता है, शिरीष की नोक से वज्र के समान कठिन मणि को वेधना चाहता है, खारे समुद्र को शहद की बूँद से मीठा करना चाहता है ॥६॥

**English Translation**– A man who wishes to turn bad habituated people to the path of virtuous or noble with his wise teaching that sprinkle ambrosia (अमृत-सुधा), attempts to tie up a wild elephant with tender lotus stalk, tries to cut a diamond with the edge of Sirisa-flower and wishes to impart sweetness in the sea of salt water with a drop of honey. (6)

**स्वायत्तमेकान्तगुणं[1] विधात्रा विनिर्मितं छादनमज्ञतायाः ।**
**विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥७॥**

**अन्वयः (Prose Order)**– विधात्रा स्वायत्तम् एकान्तगुणं अज्ञतायाः छादनं विशेषतः सर्वविदां समाजे अपण्डितानां विभूषणं मौनं विनिर्मितम् ॥७॥

**संस्कृतसरलार्थः**– ब्रह्मणा मूर्खाणां कृते आत्माधीनमत्यन्तहितकारिमौनाख्यं स्वावगुणाच्छादकं गुणं रचितम् । तच्च विदुषां सदसि तेषामाभरणं भवति । अतः अपण्डितैर्मौनिभिरेव स्थातव्यम् । अन्यथा स्वरूपप्रकाशनेनापहासास्पदता स्यादिति-भावः ॥७॥

**हिन्दी**– विधाता ने अज्ञान के आवरक, अपने अधीन रहने वाले अत्यन्त गुणकारी, विशेषकर विद्वानों के समाज में मूर्खों को सुशोभित करने वाले मौनाख्य गुण को बनाया है ॥७॥

**English Translation**– The creator has made silence the curtain for hiding the ignorance of the foolish. This cover is under their control and ends only in their good. This silence is especially ornament in as assembly of those who know a lot. (7)

**यदा किञ्चिज्ज्ञोऽहं द्विप[2] इव मदान्धः समभवं**
**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।**
**यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं**
**तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥८॥**

**अन्वयः (Prose Order)**– यदाहं किञ्चिज्ज्ञो द्विप इव मदान्धः समभवन्तदा मम मनः सर्वज्ञोऽस्मि इति अवलिप्तम् अभवत् यदा बुधजनसकाशात् किंचित् किंचित् अवगतं तदा मूर्खोऽस्मि इति ज्वर इव मे मदो व्यपगतः ॥८॥

**संस्कृतसरलार्थः–** यस्मिन् समये अहम् अल्पज्ञः सन् अशेषज्ञोस्मीति दर्पेण गज इव मदान्धः कर्तव्याकर्तव्यविवेकशून्यःजातोऽस्मि । किन्तु यदा विद्वज्जनमुखात् स्वल्पं ज्ञानमवाप्तवान् तदा 'मूढोऽस्मि' इति परिज्ञाय मदीयो विद्यागर्वो ज्वर इव निर्गत अभूत् ॥८॥

**हिन्दी–** जब मैं अज्ञानी था और हाथी की तरह अभिमान से अंधा हो रहा था तब 'मैं सर्वज्ञ हूँ' इस अभिमान से मेरा मन गर्वित था 'परन्तु जब विद्वानों के पास से कुछ-कुछ जाना तब मेरा सारा गर्व' ज्वर की तरह उतर गया और 'मैं मूर्ख हूँ' ऐसा मुझे भासित होने लगा ॥८॥

**English Translation–** When I knew a bit and was blind on account of madness, like a wild elephant, then my mind was full of pride and I felt that I was the omniscient but when I came to know my degrees from keeping in the company of the wise then my pride subsided altogether, like a fever, and I came to know that I was really ignorant. (8)

कृमिकुलचितं लालाक्लिन्नं विगर्हि[१] जुगुप्सितं
निरुपमरसं प्रीत्या खादन्नरास्थि[२] निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥९॥

**अन्वयः (Prose Order)–** श्वा कृमिकुलचितं लालाक्लिन्नं विगर्हि जुगुप्सितं निरूपमरसं निरामिषं नरास्थि प्रीत्या खादन्पार्श्वस्थं सुरपतिम् अपि विलोक्य न शङ्कते । हि क्षुद्रो जन्तुः परिग्रहफल्गुतां न गणयति ॥९॥

**संस्कृतसरलार्थः–** यथा शुनकः क्षुद्रकीटाणां समूहः व्याप्तं लालाऽर्द्रं निन्दितं घृणाजनकं मांसलेशशून्यं मानुषकीकसं प्रेमतया भक्षयन् पार्श्वस्थमिन्द्रमपि विलोक्य न लज्जते । यतो हि पामरजनो स्वीकृतवस्तुनि तुच्छत्वं क्षुद्रत्वात् न गणयति ॥९॥

**हिन्दीः–** कुत्ता कृमियों (कीड़ों) से संकुल, लार से आर्द्र, निन्दित, घृणाजनक, निरूपम रस से व्याप्त, मांस से रहित, मुनष्य की हड्डी को चूसता हुआ समीप में खड़े इन्द्र से भी लज्जित नहीं होता। उसी प्रकार पामरजन भी ग्राह्यवस्तु की असारता का परिगणन नहीं करता ॥९॥

**English Translation–** A dog is not at all afraid of the presence of Indra who is standing by, when he (the dog) is licking a bone which is full of worms and wet with saliva, loathsome, nauseative, fleshless and possessing a taste which cannot be compared to that of anything else, a mean fellow never realises his own meanness. (9)

**शिरः शार्वं स्वर्गात् पतति शिरस्तत् क्षितिधरं**
**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।**
**अधोऽधो गङ्गेयं[१] पदमुपगता स्तोकमथवा**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः ।।१०।।**

**अन्वयः (Prose Order)–** स्वर्गात् शार्वं शिरः पतति शिरसः तत् क्षितिधरम् उत्तुङ्गान्महीध्रादवनिमवनेश्चापि जलधिम् सा इयं गङ्गा अधोऽधः स्तोकं पदमुपगता। विवेकभ्रष्टानां विनिपातः शतमुखो भवति ॥१०॥

**संस्कृतसरलार्थः–** यथा मन्दाकिनी स्वर्लोकात्, शार्वं शिरमुपगता, शिरस्तः हिमवन्तं पर्वतं, हिमालयात् भुवं, पृथ्वीतः समुद्रं एवं क्रमेण उत्तरोत्तरं निम्ननिम्नतरं स्थानमुपागता। एवमेव विवेकशून्यानां शतधा अधोऽधःपतनं भवति ॥१०॥

**हिन्दी–** जिस प्रकार गंगा स्वर्ग से महादेव के शिर पर गिरती है, वहाँ से हिमालय पर्वत पर और उच्चपर्वत से पृथ्वी पर तथा पृथ्वी से समुद्र में गिरती है। इस प्रकार उसका क्रमशः पतन ही होता गया। तात्पर्य यह है कि स्थानभ्रष्ट मनुष्यों का सैकड़ों प्रकार से अधःपतन होता है ॥१०॥

**English Translation–** The holy Ganges falls from heaven upon the head of Mahadeva. From there it falls upon that well known mountain, (Himalayas) from that lofty mountain, it falls down to the earth and from there it hurries towards the Ocean. Thus that will known Ganges gets lower and lower. Those who fall from the path of discrimination fall in a hundred ways. (10)

शक्यो वारयितुं जलेन हुतभुक् छत्रेण[१] सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदौ दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।।११।।

**अन्वय: (Prose Order)–** हुतभुग्जलेन वारयितुं शक्य: सूर्यातपश्छत्रेण नागेन्द्रो निशिताङ्कुशेन समदौ गोगर्दभौ दण्डेन । व्याधि: भेषजसङ्ग्रहै: विषं विविधै: मन्त्रप्रयोगै: एवं सर्वस्य शास्त्रविहितम् औषधमस्ति मूर्खस्य औषधं नास्ति ।।११।।

**संस्कृतसरलार्थ:–** यथा लौकिकाग्नि: उदकेन, घर्म: छत्रेण, गजश्रेष्ठतीक्ष्णाङ्कुशेन, समदौ वृषभरासभौ दण्डेन, व्याधि: औषधसग्रहेण, विषं विविधमन्त्रप्रयोगेण शाम्यति, एवं सर्वस्य शास्त्रविधिचोदितं औषधमस्ति । परं मूर्खस्य औषधं न क्वापि श्रूयते ।।११।।

**हिन्दी–** अग्नि जल से, सूर्य की धूप छाते से, हाथी को तीक्ष्ण अंकुश से, मदोन्मत्त बैल और गधे को दण्डे से, रोग का निदान औषधों के सेवन से, विष का उपशमन अनेकमंत्रों के प्रयोग से, इस प्रकार शास्त्रों में सबकी औषधि का कथन है परन्तु मूर्ख की औषधि का कथन नहीं है ।।११।।

**English Translation–** A fire can be controlled with water. Sunshine with an umbrella, an elephant with a sharp goad, intoxicated cow and ass with a staff, a disease can be cured by using the medicines properly, and a poison can be warded off by means of using efficacious spells. The books of the learned have prescribed a medicine for everything but none for a fool. (11)

साहित्यसङ्गीतकलानभिज्ञ[१]: साक्षात्पशु: पुच्छविषाणहीन: ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।१२।।

**अन्वय: (Prose Order)–** (जन:) साहित्यसंगीतकलानभिज्ञ: पुच्छविषाण-हीन: साक्षात्पशु: (एव अस्ति)। (यतो हि स:) तृणन्न खादन्नपि जीवमानस्तत्पशूनां परमं भागधेयम् ।।१२।।

**संस्कृतसरलार्थ:–** य: जन: साहित्यशास्त्रे संगीतशास्त्रकलासु च अनभिज्ञ:

सः मूर्तिमान् शृंगपुच्छविरहितः पशुरेवास्ति। यतो हि सः घासं न भक्षयन् अपि जीवति तत् पशूनां सौभाग्यमेवास्ति। अन्यथा साहित्यसंगीतकलानभिज्ञाः यदि घासं भक्षयेयुः तर्हि पशवो घासाभावान्मृतिवोपगच्छेयुः ॥१२॥

**हिन्दी–** जो मनुष्य साहित्य तथा संगीत आदि कलाओं से अपरिचित है वह पूछ तथा सींगों के बिना साक्षात् मूर्तिमान् पशु ही है। घास न खाकर भी ऐसा मनुष्य जो जीता है तो यह पशुओं का परम सौभाग्य है ॥१२॥

**English Translation–** One who doesn't know literature, music and other fine arts is evidently a beast but lacking only so far as he has not got tail and horns. (12)

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥१३॥**

**अन्वयः (Prose Order)–** येषां न विद्या, न तपो, न दानं, न ज्ञानं, न शीलं, न गुणः न धर्मः ते मर्त्यलोके भुवि भारभूताः (सन्ति) मनुष्यरूपेण मृगाः चरन्ति ॥१३॥

**संस्कृतसरलार्थः–** ये जनाः विद्या तपसा दानेन विवेकेन सद्वृत्तेन, सौजन्यादिगुणैः धर्मेण च विहीनाः सन्ति ते अनित्यात्मकेऽस्मिन् भुवने भारभूताः सन्ति। ते अस्यां पृथिव्यां भाररूपाः सन्तो मानवरूपेण पशवः एव भ्रमन्ति, तेषां जन्म जगति निरर्थकमेव ॥१३॥

**हिन्दी–** जिन मनुष्यों के पास न तो विद्या है, न तप है, न दान है, न ज्ञान है, न सदाचार है और न धर्म है, वे इस पृथ्वी पर भारभूत हैं और मनुष्य के रूप में वे पशु के समान व्यर्थ ही विचरण कर रहे है ॥१३॥

**English Translation–** Those in whom there is no learning, penance, charity, knowledge, character, any virtue or a sense of duty are a burden for the earth in this mortal world and wander here apparently men but in reality they are beasts. (13)

**वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।**
**न मूर्खजनसम्पर्कःसुरेन्द्रभवनेष्वपि ॥१४॥**

**अन्वयः (Prose Order)–** वनचरैःसह पर्वतदुर्गेषु भ्रान्तं वरम्, (किन्तु) मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि न वरम् ॥१४॥

**संस्कृतसरलार्थः–** वनवासिभिः सह पर्वत-दुर्गमप्रदेशेषु वासः यथाकथञ्चिच्छोभनः। परं बालिशैःसह पुरन्दर प्रासादेषु वासः न उचितः ॥१४॥

**हिन्दी–** वनवासियों के साथ पर्वतों और दुर्गम मार्गों में भ्रमण कर लेना अच्छा है परन्तु मूर्ख लोगों के साथ इन्द्र के भवनों में रहना सुखावह नहीं है ॥१४॥

**English Translation–** It is better to wander among mountains and difficult passages than to live in the palace of Indra with fools. (14)

**शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयाऽऽगमा**
**विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।**
**तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं[1] विनापीश्वराः**
**कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः ॥१५॥**

**अन्वयः (Prose Order)–** शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः विख्याताः कवयो यस्य प्रभोर्विषये निर्धना वसन्ति तत् वसुधाधिपस्य जाड्यम्हि कवयोऽर्थं विनापीश्वरः हि कुपरीक्षकाः कुत्स्याः स्युः यैर्मणयोऽर्घतः पातिताः ॥१५॥

**संस्कृतसरलार्थ :–** सर्वत्रप्रसिद्धाः विद्वांसः यस्य राज्ञः देशे धनहीनाः सन्तः वसन्ति तत् वसुधाधिपस्य हैन्यम् । विद्वांसस्तु धनं विनाऽपि समर्थाः सन्ति । यदि कुपरीक्षकाः बहुमूल्यमणेः यथावत् मूल्यं न कथयन्ति अपितु मिथ्याभूतं क्षुद्रतरं मूल्यं व्यवस्थापयन्ति तत्तेषामेव कुत्सितत्वम् । विद्वांसस्तु कुपरीक्षकोपहतमणय इव न कुत्स्या इति ॥१५॥

**हिन्दी :–** जो शास्त्रों से भूषित, शब्दों से मनोहर वचनों वाले तथा शिष्यों को देने योग्य विद्यावाले प्रसिद्ध, कवि (विद्वान्) किसी राजा के राज्य में निर्धन होकर रहते हैं तो यह उस राजा (शासक) की मूर्खता है । विद्वान् तो धन के विना भी राजा ही हैं ।क्योंकि जिन कुपरीक्षकों ने महार्हमणि को उचित मूल्य से निम्न मूल्य पर लगाया वे कुपरीक्षक ही निन्दनीय है (वे महार्घ मणियाँ नहीं) ॥१५॥

**English Translation :–** It is the folly of a king that he allows well known poets to remain poor in the kingdom. The poets whose speeches have been made charming with the knowledge of different shastras, and possess a wisdom worth giving to their disciples are, nothing short of monarchs, even without wealth. Those jewellers are to be blamed who undervalue a diamond. The diamond does not lose the real value thereby. (15)

**हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-**
**ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं**
**येषां तान्प्रति मानमुज्झत नृपाः ! कस्तैः सह स्पर्धते ।।१६।।**

**अन्वयः (Prose Order)–** यद् हर्तुर्गोचरं न याति सर्वदा किमपि शं पुष्णाति, अर्थिभ्यः प्रतिपाद्यमानमनिशं परां हि वृद्धिं प्राप्नोति, येषां विद्याख्यमन्तर्धनं कल्पान्तेष्वपि निधनं न प्रयाति नृपास्तान् प्रति मानमुज्झत तैः सह कः स्पर्धते ॥१६॥

**संस्कृत सरलार्थ :–** यद्विद्याख्यं धनं चौरस्य गोचरं न याति, सर्वदा अनिर्वाच्यं सुखं प्रवर्धयति, सदा विद्यार्थिभ्यो व्याख्यायमानमभ्युच्छ्रयं प्राप्नोति, प्रलयेष्वपि नाशं न प्राप्नोति तद्विद्याभिधानं धनं येषां विदुषां वर्तते तान् प्रति हे राजानः! दुराग्रहं त्यजत । तैर्विद्वद्भिः सह कः पुमान् निगृह्णाति ॥१६॥

**हिन्दी :–** जो विद्यारूप धन चोर को लभ्य नहीं है, जो सर्वदा अनिर्वचनीय सुख प्रदान करता है, याचक (विद्यार्थियों) को दिये जाने से सदैव अभ्युन्नति को प्राप्त होता है, ऐसा विद्वानों का विद्यारूपी सुगुप्तधन है जो कल्पों का अन्त होने पर भी नष्ट नहीं होता है । इस हेतु हे राजाओं ! उन विद्वानों से दुराग्रह मत करो, उन विद्वानों की समता संसार में कौन कर सकता है ? ॥१६॥

**English Translation :–** Knowledge is the wealth of the learned. This wealth is quite different from the ordinary one. It can not be stolen away by a thief and always brings a welfare. And this treasure of knowledge is not exhausted by giving away, but on the contrary, it attains an immense growth, if it is imparted to those who need it. It does not perish at all even at the time of destruction of the universe O king ! therefore give up your stately pride before possessed of such a treasure. Who can, in this world, compete with them ? (16)

**अधिगतपरमार्थान् पण्डितान् माऽवमंस्था-**
**स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।**
**अभिनवमदरेखाश्यामगण्डस्थलानां**
**न भवति विसतन्तुर्वारणं वारणानाम् ।।१७।।**

**अन्वयः (Prose Order)–** अधिगतपरमार्थान् पण्डितान् मा अवमंस्थाः । लघु तृणमिवलक्ष्मीस्तान् नैव संरुणद्धि । अभिनवमदरेखाश्यामगण्डस्थलानां वारणानां बिसतन्तुः वारणं न भवति ॥१७॥

**संस्कृत सरलार्थ :–** भो राजन् ! अधिगतब्रह्मतत्त्वज्ञान् पण्डितान् मा अवमानय । यतः ग्रासपत्रमिव स्तोकं त्वदीयसम्पतिः तान् तत्त्वज्ञान् तृणमिव रोद्धुं न शक्ष्यति । यतो हि मदनसिक्तगण्डस्थलानां मतङ्गजानां मृणालसूत्रं प्रतिबन्धकभूतः न भवति ॥१७॥

**हिन्दी :–** जिन्होंने वस्तु के यथार्थ तत्त्व को जान लिया है ऐसे पण्डितों का अपमान मत करो । तिनके के समान क्षुद्र लक्ष्मी उन विद्वानों को रोक नहीं सकती । (आप ही सोचिए) नूतनमद की धाराओं से श्याम कपोलों वाले मदान्ध हाथियों को कोमल कमल नाल के सूत्र से नहीं बांधा जा सकता ॥१७॥

**English Translation :–** Do not disgrace the learned men who know the great Truth. The wealth which to them is like a blade of grass, cannot bind them. The elephants whose wall-like temples have become dirty on account of the fresh flowing lines of rut cannot be bound with a fine thread of Bisa. (17)

अम्भोजिनीवननिवास[1]विलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ।।१८।।

**अन्वयः (Prose Order)–** नितरां कुपितो विधाता हंसस्याम्भोजिनीवन-निवास विलासमेव हन्ति । अस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिम् अपहर्तुं तु असौ न समर्थः ।।१८।।

**संस्कृतसरलार्थ :–** केनचिद्धेतुना क्रुद्धः सन् विधाता हंसानां विहारविलासमेव नाशयति नान्यत् किं त्वसौ ब्रह्मा तेषां नीरक्षीरविवेकविषये प्रख्यातां कीर्तिं चौरयितुं न समर्थः भवति । एवं कुपितो राजा धनमन्यविधमादरं वा न दत्वा पण्डितानां सुखानि न्यूनतां नेतुं शक्नुवन्ति न तु तेषामशेषविद्यापरिशीलनजनितचातुर्यम्, ते यत्र गमिष्यन्ति तत्रैव प्राभविष्यन्ति ।।१८।।

**हिन्दी :–** अत्यन्त क्रोधित होकर विधाता भी अधिक से अधिक हंसो के कमलिनियों के वन में निवासरूप विलास को ही नष्ट कर सकता है किन्तु हंस की 'दूध का दूध और पानी का पानी' कर देने की जो जगद्विख्यात चतुरता है उसको विधाता भी नष्ट नहीं कर सकता ।।१८।।

**English Translation :–** Even the Creator of the universe, if angry, can only rob a goose of its residence in the flocks of lotuses. But even he cannot remove the fame of its cleverness in differenciating water from the milk. (18)

केयूराणि न भूषयन्ति पुरुषं, हारा न चन्द्रोज्ज्वला
न स्नानं, न विलेपनं, न कुसुमं, नालङ्कृता मूर्द्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु[1] भूषणानि सततं, वाग्भूषणं भूषणम् ।।१९।।

**अन्वय : (Prose Order)–** पुरुषं केयूराणि न भूषयन्ति, चन्द्रोज्ज्वला हारा न, स्नानं, न विलेपनं, न कुसुमं, नालङ्कृता मूर्धजाः, या संस्कृता धार्यते सा एका वाणी पुरुषं समलङ्करोति भूषणानि क्षीयन्ते वाग्भूषणं सततं भूषणं खलु ।।१९।।

**संस्कृतसरलार्थ :–** पुरुषं केयूराणि, धवलतरा हारा: स्नानं, विलेपनं, पुष्पं, सम्यक् प्रसाधिता: शिरोरुहा अपि न भूषयन्ति। किन्त्वेका केवला वाणी पुरुषं सम्यग्भूषयति। कालक्रमेण लोकप्रसिद्धानि भूषणानि हीनप्रभाणि जायन्ते सर्वथा वा नश्यन्ति। परं वाग्भूषणं नित्यभूषणं भवति। कदापि न नश्यतीति भाव:। अत: वाग्भूषणाय सर्वै: प्रयतनीयम्॥१९॥

**हिन्दी :–** मनुष्य को न तो बाहुभूषण आभूषित करते हैं, और नहीं चन्द्रनिर्मल हार न, स्नान, न चन्दनानुलेपन पुष्प और न केशों का अलंकृत विन्यास। एक मात्र संस्कारित वाणी ही धारण करने पर मनुष्य को अलंकृत करती है। काल के प्रवाह में सभी आभूषण निश्चय ही नष्ट हो जाते हैं परन्तु वाणी का भूषण सदा भूषण ही रहता है॥१९॥

**English Translation :–** Ornaments do not adorn a man, nor the moon-white necklaces give beauty to him. Neither do baths and embalmings, flowers, nor well-dressed hair adorn a man. Only a speech the bearing of a refined speech, adorns a man. The other ornaments waste away while the ornament of speech remains always. (19)

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,**
**विद्या भोगकरी यश:सुखकरी, विद्या गुरूणां गुरु: ।**
विद्या बन्धुजनो विदेशगमने, विद्या परं दैवतं[1],
विद्या राजसु पूज्यते न हि धनं, विद्याविहीन: पशु: ।।२०।।

**अन्वय : (Prose Order)–** विद्या नाम नरस्याधिकं रूपम्। विद्या प्रच्छन्नगुप्तं धनम्। विद्या भोगकरी, यश:सुखकरी, विद्या गुरूणां गुरु: विद्या विदेशगमने बन्धुजन:। विद्या परं दैवतम्। विद्या राजसु पूजिता, धनं, नहि। विद्या विहीन: पशु: ॥२०॥

**सरलसंस्कृतार्थ :–** विद्या नरस्य विद्यावतोऽधिकं वरतरं रूपमस्ति। तत् अतिगुप्तमन्तर्धनं हृदयगुहायाम् अस्ति। विद्या भोगान् करोति। विद्या यशस: सुखस्य च सम्पादनकरी तादृशी किञ्चैषं विद्या गुरूणामपि गुरु:। प्रवासे विद्या सुहृज्जनवत्सहायिका भवति। विद्या परमात्मभूता अस्ति। विद्यैव राजमध्ये प्रशस्यते नहि धनं पूज्यते। यत: एवं विधं गौरवं विद्यावास्ततो विद्याविहीन: जन: पशुवद् एवास्ति॥२०॥

**हिन्दी :–** मनुष्य का विद्या नामक एक महनीय रूप है और यह अतिगूढ आन्तरिक ज्ञान रूप धन है। विद्या, राज्य– यशादिभोगों को देनेवाली तथा यश और सुख को उत्पन्न करनेवाली है। वह गुरुओं की भी गुरु है। विदेश गमनावसर में यह बन्धु है। विद्या परमात्मभूत है। विद्या ही राज्य में पूजित होती है धन नहीं। इस हेतु विद्या से हीन व्यक्ति पशुवत् है ॥२०॥

**English Translation :–** Here is one greater ornament namely knowledge. This is an internal and hidden knowledge-treasure. It produces comforts, fame and pleasures. It is a preceptor of preceptors. When one is in unknown lands it is in Vidya or knowledge that has got a relation. Vidya is the supreme deity. Among kings knowledge alone is honoured and not wealth. There fore one who is destitute of learning should be considered a beast. (20)

**क्षान्तिश्चेत्कवचेन किं, किमरिभिः क्रोधोऽस्ति चेद्देहिनां,**
**ज्ञातिश्चेदनलेन किं, यदि सुहृद्दिव्यौषधैः किं फलम् ।**
**किं सर्पैर्यदि दुर्जनाः, किमु धनैर्विद्याऽनवद्या यदि,**
**व्रीडा चेत्किमु भूषणैः, सुकविता यद्यस्ति राज्येन किम् ॥२१॥**

**अन्वय : (Prose Order)–** देहिनां क्षान्तिश्चेत् कवचेन किम्, क्रोधोऽस्ति चेत् अरिभिः किम्। ज्ञातिश्चेत् अनलेन किम् यदि सुहृदस्ति दिव्यौषधैः किम् फलम्। यदि दुर्जनाः सर्पैः किम्, यदि अनवद्या विद्या धनैः किमु। चेद्व्रीडा भूषणैः किमु। यदि सुकविता अस्ति राज्येन किम् ॥२१॥

**सरलसंस्कृतार्थ :–** यदि देहिनां क्षमास्ति तर्हि कवचस्य आवश्यकता नास्ति। यदि क्रोधो वर्तते तर्हि अन्येषां शत्रूणामावश्यकता नास्ति। दायादोऽस्ति चेत् अग्नेरावश्यकता नास्ति। यदि खलाः सन्ति तर्हि आशीविषैः किम्। यदि वेदवेदाङ्गाध्यात्मिकविद्या अस्ति तदा धनैः किम्। अकार्यप्रवृत्तौ मनःसंकोचलक्षण-लज्जा अस्ति चेत् तर्हि अन्येषामाभूषणानां आवश्यकता नास्ति। यदि सत्पाण्डित्यम् वर्तते तदा राज्यस्य कापि आवश्यकता नास्ति ॥२१॥

**हिन्दी :–** मनुष्यों में यदि क्षमा है तो कवच (कृत्रिम शरीररक्षक) की क्या आवश्यकता है, यदि क्रोध है तो शत्रुओं की क्या आवश्यकता, और यदि बन्धुजन हैं तो अग्नि की क्या आवश्यकता है। यदि मित्र हैं तो दिव्यौषधों से, यदि दुर्जन हैं तो सर्पों से, यदि निर्दोष विद्या है तो धन से, लज्जा है तो आभूषणों से, और यदि उत्तम काव्य निर्माण की शक्ति है तो राज्य से क्या प्रयोजन है ॥२१॥

**English Translation :–** If one is possessed of forgiveness then of what use is an armour to him ? If one has an evil temper then there in no need of enemies, If one has got his blood relations then he doesnot need fire to burn him. If you have got a friend then you do not require any heavenly cure for yourself. If one is surrounded by wicked persons, they are sufficient to bite him, deadly snakes are never needed to kill such a man. If you possess a stainless knowledge you need not have money. If you have a poetic genius you need not have a kingdom. (21)

**दाक्षिण्यं स्वजने, दया परिजने शाठ्यं सदा दुर्जने,**
**प्रीतिः साधुजने, नयो नृपजने, विद्वज्जने चार्जवम् ।**

**शौर्यं शत्रुजने, क्षमा गुरुजने, नारीजने[1] धूर्तता[2],**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥२२॥**

**अन्वय : (Prose Order)–** स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवं, शत्रुजने शौर्यं, गुरुजने क्षमा, नारीजने धूर्तता, ये पुरुषाः एवं कलासु कुशलः तेषु एव लोकस्थितिः (अस्ति) ॥२२॥

**सरलसंस्कृतार्थ :–** स्वजनेषु औदार्यं, भृत्यजनेषु कृपा, खलजनेषु विप्रियकारित्वं, शिष्टपुरुषे स्नेहः, राजसु नीतिः, सुपण्डितलोकेषु सारल्यं, शत्रुजनेषु पराक्रमः, पित्रादिषु सहिष्णुत्वं, कान्ताजनेषु चातुर्य-इत्येवमुक्तविधासु कलासु ये जनाः निपुणास्तेषु पुरुषेष्विव लोकस्थितिः अस्ति। त एव सज्जना लोके मर्यादां स्थापयन्ति। एवं भूतास्तु विद्वांस एव न त्वन्य इति ॥२२॥

**हिन्दी :–** स्वजनों में उदारता, परिजनों पर दया, दुष्टों के साथ सदैव दुष्टता, सज्जनों से प्रीति, राजाओं के साथ नीति, विद्वानों से सरलव्यवहार, शत्रुओं पर पराक्रम, वृद्धजनों के प्रति क्षमा, स्त्रियों के साथ चातुर्य-जो पुरुष इन कलाओं में निष्णात हैं, संसार उन्हीं पर टिका हुआ है ॥२२॥

**English Translation :–** The world is up held by those who are perfect in the following :– (1) Generosity towards one's own relations (2) Merry for others (3) Wickedness towards rogues. (4) Love for goodmen (5) Policy or diplomacy for monarchs. (6) Unpretentious behaviour towards learned. (7) A valour for enemies. (8) Forbearance for elders and (9) Cleverness in dealing with women. (22)

**जाड्यं धियो हरति, सिञ्चति वाचि सत्यं,**
**मानोन्नतिं दिशति, पापमपाकरोति ।**
**चेतः प्रसादयति, दिक्षु तनोति कीर्तिं,**
**सत्सङ्गतिः कथय किं न करोति पुंसाम् ? ॥२३॥**

**अन्वय : (Prose Order)–** कथय सत्सङ्गतिः पुंसां किन्न करोति, धियो जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापमपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति ॥२३॥

**सरलसंस्कृतार्थ :–** कथयसज्जनसमागमः पुंसां किं श्रेयो न करोति, सर्वमपि श्रेयः करोत्येव । यथा एषा बुद्धेर्मान्द्यं हरति, वचने सत्यं वर्षति, बहुमानातिशयं प्रयच्छति किल्बिषं नाशयति, चित्तं प्रहर्षयति, सर्वेषु देशेषु यशः तनोति । अतस्तैरेव संगतिः कर्तव्या, न तु दुर्जनैरिति ॥२३॥

**हिन्दी :–** (हे मित्र !) कहिये, सत्संगति मनुष्यों को कौन-सा उत्तम फल नहीं देती ? (अर्थात् सभी कुछ सम्पादित कराती है) बुद्धि की जड़ता अथवा मन्दता को दूर करती है, वाणी में सत्य की वर्षा करती है, मान-प्रतिष्ठा की वृद्धि करती है, पाप को निवृत्त करती है, चित्त को प्रसन्न करती है और दिशाओं में कीर्ति को प्रसृत करती है ॥२३॥

**English Translation :-** O friend ! Tell me what good is not produced by the company of the good men ? It removes the bluntness of intellect and endows speech with truth. Increases one's respect and washes off sin. It pleases the heart and spreads one's fame wide through all the four quarters. (23)

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।**
**नास्ति येषां[१] यशःकाये जरामरणजं भयम् ।।२४।।**

**अन्वय : (Prose Order)–** येषां यशःकाये जरामरणजं भयं नास्ति ते रससिद्धाः सुकृतिनः कवीश्वराः जयन्ति ।।२४।।

**सरलसंस्कृतार्थ :–** येषां कीर्तिशरीरे जरामरणजं भीतिर्नास्ति ते पुण्यवन्तः शृंगारादिषु नवसु रसेषु सिद्धाः प्रक्रान्तदर्शिनः महाकवयः सर्वोत्कर्षेण वर्तन्ते ।।२४।।

**हिन्दी :–** जिनके यशरूपी शरीर को वृद्धावस्था और मृत्यु का भय नहीं है, उन पुण्यात्मा तथा रसनिरूपण में सिद्धहस्त महाकवियों की जय है ।।२४।।

**English Translation :–** Victorious are those blessed poets who are efficient in describing the nine literary sentiments, love, wonder etc; their fame is free from all dangers of death and senility. (24)

**सूनुः सच्चरितः, सती प्रियतमा, स्वामी प्रसादोन्मुखः,**
**स्निग्धं मित्रमवञ्चकः परिजनो, निष्क्लेशलेशं मनः ।**
**आकारो रुचिरः, स्थिरश्च विभवो, विद्यावदातं मुखं,**
**तुष्टे विष्टपहारिणीष्टदहरो संप्राप्यते देहिना ।।२५।।**

**अन्वय : (Prose Order)–** देहिना विष्टपहारिणीष्टदहरौ तुष्टे (सति) सच्चरितः सूनुः, प्रियतमा सती, प्रसादोन्मुखः स्वामी, स्निग्धं मित्रम्, अवञ्चकः परिजनो, निष्क्लेलेशं मनो, रुचिर आकारः, स्थिरश्च विभवो, विद्यावदातं मुखं च सम्प्राप्यते ।।२५।।

**सरलसंस्कृतार्थ :–** विष्णौ इष्टदे प्रसन्ने सति मनुष्येण शोभनाचारः पुत्रः, साध्वी भार्या, प्रसन्नः प्रभुः, प्रेमपूर्णं मित्रं, छलरहितः कुटुम्बिजनः, दुःखरहितं चित्तं, स्पृहाजनकः आकारः, अक्षयः विभवः, ज्ञानेन प्रकाशमानं मुखमित्येतत् सर्वं प्राप्यते ।।२५।।

**हिन्दी :–** जगत् के स्वामी, इष्ट वस्तुओं के देनेवाले श्रीहरि के संतुष्ट होने पर मनुष्य सदाचारी पुत्र, पतिव्रता स्त्री, प्रसन्न स्वामी, स्नेही मित्र, शुभेच्छु परिजन, क्लेशलेश रहित मन, सुन्दर आकृति, स्थायी सम्पत्ति, और विद्या के कारण प्रोज्ज्वल मुख प्राप्त करता है ॥२५॥

**English Translation :–** The following (blessings) are obtained when God, who is the sole monarch of heaven, and the giver of desires is pleased with one :– (1) A well-behaved son. (2) A chaste wife (3) A master who is always ready to do a favour. (4) An affectionate friend. (5) Such relations as do not deceive. (6) Mind not distressed in the least (7) A good appearance (8) An imperishable wealth. (9) And features shining with knowledge. (25)

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः, सत्यवाक्यं,**
**काले शक्त्या प्रदानं, युवतिजनकथामूकभावः परेषाम् ।**
**तृष्णास्त्रोतोविभङ्गो, गुरुषु च विनयः, सर्वभूतानुकम्पा,**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥२६॥**

**अन्वय : (Prose Order)–** प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, काले सत्यवाक्यं, शक्त्या प्रदानं, परेषां युवतिजनकथामूकभावः, तृष्णास्त्रोतोविभङ्गः, गुरुषु विनयः, च, सर्वभूतानुकम्पः, एष सर्वशास्त्रेषु अनुपहतविधिः सामान्यः श्रेयसां पन्थाः ॥२६॥

**सरलसंस्कृतार्थ :–** प्राणिहिंसाया निवर्तनं, परद्रव्यहरणे मनोरोधः, यथोचितसमये यथार्थभाषणं, वित्तानुसारेण त्यागः, परस्त्रीवृत्तान्तकथने मौनं, तृष्णाप्रवाहभङ्गः, वयोवृद्धेषु नम्रताव्यवहारः, सर्वप्राणिष्वनुग्रहभावः इत्ययं सर्वशास्त्रेषु कथितः अखण्डितैश्वर्यादिश्रेयः प्राप्तिमार्गः अस्ति ॥२६॥

**हिन्दी :–** हिंसा से निवृत्ति, परद्रव्यापहरण से विमुखता, कालोचित सत्यवचन, धन के अनुसार दान, परस्त्री चर्चा में मौन, तृष्णा के प्रवाह का संरोध, पूज्यजनों के साथ विनय का व्यवहार, सर्वप्राणियों पर कृपा भाव यह समस्त प्रकार के कल्याणों को प्राप्त करने का एकमात्र ऐसा उपाय है जिसका समस्त शास्त्रों में एक सा विधान प्राप्त होता है ॥२६॥

**English Translation :–** To practise the following eight dietates is a common way to obtain all sorts of blessing:– This is the only way that has been unanimously prescribed by all the sacred books. (1) Causing no pain to others. (2) Not coveting another's wealth. (3) Truthfulness (4) Charity at proper times accecording to one's means (5) Abstaining from praising the wives of others. (6) Absence of greed. (7) Modesty in the presence of elders. (8) Pity for all creatures (26)

**प्रारभ्यते न खलु विघ्नभयेन नीचैः,**
**प्रारभ्यय विघ्नविहता[१] विरमन्ति मध्याः ।**
**विघ्नैः पुनः पुनरपि[२] प्रतिहन्यमानाः**
**प्रारभ्य चोत्तमजना[३] न परित्यजन्ति ।।२७।।**

**अन्वय : (Prose Order)–** नीचैः विघ्नभयेन खलु न प्रारभ्यते, मध्याः प्रारभ्य विघ्नविहता विरमन्ति । उत्तमजनाः विघ्नैः पुनः पुनः प्रतिहन्यमानाः अपि प्रारब्धं न परित्यजन्ति ।।२७।।

**सरलसंस्कृतार्थ :–** अधमाः जनाः अन्तरायभयहेतुना कार्यारम्भमेव न कुर्वन्ति । मध्यमा जनास्तु कार्यमुपक्रम्य विघ्नैः विह्वलीकृताः सन्तो मध्य एव कार्यं त्यक्त्वा विश्राम्यन्ति । परन्तु पुरुषश्रेष्ठाः विघ्नैः पौनः पुन्येन प्रतिहन्यमाना अपि उपक्रान्तं कर्म न विसृजन्ति ।।२७।।

**हिन्दी :–** अधम प्रकृति के मनुष्य सत्कार्यों को प्रारम्भ ही नहीं करते । मध्यम प्रकृति सम्पन्न पुरुष विघ्नों से प्रताडित होकर प्रारम्भ किये हुए कार्य को मध्य में ही छोड़ देते हैं। परन्तु उत्तमप्रकृति जन बारम्बार विघ्नों से आहत होने पर भी आरम्भ किये कार्य को सम्पन्न किये विना नहीं छोडते ।।२७।।

**English Translation :–** Those who give up an attempt to do good when faced with difficulties, are base people. Those who begin but fail to go through on account of obstacles, are mediocre. The great never give up what they have once taken up whatever difficulties might arise. (27)

असन्तो नाऽभ्यर्थ्याः, सुहृदपि न याच्यः कृशधनः,
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं[1], पदमनुविधेयं च महतां,
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ।।२८।।

**अन्वय : (Prose Order)–** प्रिया न्याय्या वृत्तिः, असुभङ्गेऽपि मलिनम् असुकरम्, असन्तो न अभ्यर्थ्याः, कृशधनः सुहृद अपि न याच्या, विपदि उच्चैः स्थेयम्, महतां पदम् अनुविधेयम्, इदम् विषमम् असिधाराव्रतं सतां केन उद्दिष्टम् ।।२८।।

**सरलसंस्कृतार्थ :–** प्रिया नीतिप्रवणा वृत्तिः आश्रयणीया, प्राणविच्छेदेऽपि दुष्करं कार्यमकर्तव्यम्, असन्तः न याचनीयाः, अल्पविभवः सुहृदपि न प्रार्थनीयः, अनर्थसंकटे मानोन्नतिर्न त्याज्या, पूज्यानां मार्गोऽनुसरणीयः–इत्येतत् असाधारणतया दुष्करं व्रतं सज्जनानां निसर्गसिद्धमेव, न केनापि उपदिष्टम् ।।२८।।

**हिन्दी :–** प्रिय और न्याय पद से न गिरा हुआ व्यवहार, प्राणसंकटकाल में भी दुष्कर्म न करना, दुर्जनों से कुछ भी न मांगना, अल्पविभव मित्र से याचना न करना, विपत्ति काल में उच्चभाव से स्थिर रहना, सज्जनों के मार्ग का अनुसरण करना, –यह तलवार की धार के समान कठोर तीव्र व्रत सज्जनों को किसने बताया है ? ।।२८।।

**English Translation :–** Gentle appropriate behaviour and not do evil even when threatened with loss of life, not to court help from the wicked, not to ask a friend for money, to remain high in adversity and to follow in the footsteps of the great is a tedious vow that noble persons have taken. We do not know who taught them this ! (28)

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवल[1]ग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ।।२९।।

**अन्वय : (Prose Order)–** क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशामापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि मत्तेभेन्द्रविभिन्नकुम्भकवल-ग्रासैकबद्धस्पृहो मानमहतामग्रेसरः केसरी किं जीर्णं तृणमत्ति ? ।।२९।।

**सरलसंस्कृतार्थ :–** बुभुक्षया दुर्बलः, जरया जीर्णः, विश्लथाङ्गतया बलहीनः, मरणासन्नोऽपि मत्तगजविदारितकुम्भस्थलमांसभोजी अभिमानोन्नतानामग्रगण्यः सिंहः किं शुष्कघासमत्ति। नात्त्येवेत्यर्थः। तथैव मानी जनः कष्टां दशां गतोऽपि स्वमहत्त्वापहारिणीं चेष्टां न करोति ॥२९॥

**हिन्दी :–** क्षुधा से पीडित, वृद्धावस्था से क्षीण, शक्ति से हीन, विपन्नावस्था में पडा, तेजोहीन तथा प्राण संकटकाल में भी एकमात्र मदमत्त हाथियों के कपोलों को फाडकर खाने वाला आत्मसम्मानियों में अग्रगण्य सिंह, क्या सूखी घास खाता है? अर्थात् कभी नहीं खाता ॥२९॥

**English Translation :–** Does ever a lion– the first and foremost of those that are great by self respect– eat, a worn out blade of grass, although starving, senile and utterly exhausted, and though surrounded by Calamities and lacking in the lustre of life and even when dying, because his only desire is to feed himself upon the broken temples of huge elephant full of strength and youth, does he ever do it ? (29)

स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति, न तु तत्तस्य क्षुधाशान्तये।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं,
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥३०॥

**अन्वय : (Prose Order)–** श्वा स्वल्पस्नायुवसावशेषमलिनं निर्मांसमपि गोः अस्थि लब्ध्वा परितोषम् एति। तत्तस्य क्षुधाशान्तये तु न। सिंहः अङ्कमागतमपि जम्बुकं त्यक्त्वा द्विपम् निहन्ति। कृच्छ्रगतोऽपि सर्वो जनः सत्वानुरूपं फलम् वाञ्छति ॥३०॥

**सरलसंस्कृतार्थ :–** लेशमात्रावशिष्टस्नायुवसामलिनं गोः कीकसं लब्ध्वा शुनकः सन्तुष्यति तत्तु तस्य अशनायाशान्तये न पर्याप्तम्। किन्तु समीपवर्तिनं क्रोष्टारं त्यक्त्वा सिंहः हस्तिनं निहन्ति। परमार्थतः संकटस्थोऽपि अशेषो जनः स्वस्वसामर्थ्यानुसारमेव फलं काङ्क्षति ॥३०॥

**हिन्दी :–** कुत्ता अल्पमात्रावशिष्ट स्नायु और वसा से मलिन गौ की हड्डी को पाकर संतुष्ट हो जाता है यद्यपि वह उसकी क्षुधा निवृत्ति के लिए पर्याप्त नहीं है। (इसके विपरीत) सिंह समीपवर्ती गीदड को छोड हाथी को मारता है। (वस्तुतः

ठीक ही है क्योंकि) दुरवस्था में पहुंच कर भी समस्त प्राणी अपने बल के अनुरूप ही फल की इच्छा करते हैं ।।३०।।

**English Translation :–** A dog is satisfied with a small and dirty bone of a cow, with some shreds of sinews hanging on to it, but that does not satisfy his hunger. A lion kills an elephant and lets go a jackal that has fallen into his lap. The moral is that all wish for a suitable share though the circumstances might be adverse. (30)

**लाङ्गूलचालनमधश्चरणावपातं[१],**
**भूमौ निपत्य वदनोदरदर्शनं च ।**
**श्वा पिण्डदस्य कुरुते, गजपुङ्गवस्तु**
**धीरं विलोकयति, चाटुशतैश्च भुङ्क्ते ।।३१।।**

**अन्वय : (Prose Order)–** श्वा पिण्डदस्य (पुरतः) लाङ्गूलचालन-मधश्चरणावपातं भूमौ निपत्य च वदनोदरदर्शनं कुरुते, गजपुङ्गवस्तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ।।३१।।

**सरलसंस्कृतार्थ :–** सारमेयः पिण्डदस्य पुरस्तात् पुच्छविवर्तनं भूतले चरणावपातं भूमौ स्वयमेव पतित्वा वक्त्रकुक्षिप्रदर्शनं च करोति । किन्तु पिण्डदसंनिधावपि गजेन्द्रः गंभीरं पश्यति अनेकानुनयवचनानन्तरं च कथंचिद् खादति इमा नीचानीचजनयोर्दृष्टान्ताविति भावः ।।३१।।

**हिन्दी :–** कुत्ता रोटी देनेवाले के सामने पूंछ हिलाता है, भूतलपर पैरों लोटता है तथा भूमि पर स्वयं गिरकर मुख तथा पेट दिखाता है परन्तु गज (भोजन देनेवाले के सामने) गंभीरता से देखता है और अनेक अनुनय-विनय के पश्चात् खाता है ।।३१।।

**English Translation :–** A dog wags its tail and fa at the feet of one who gives it a loaf of bread. It ly prostrate on the ground, shows its mouth and belly also its benefector, on the other hand an elephant looks w patience at his driver and takes food only when flatte in a hundred ways. (31)

परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ।। ३२ ।।

**अन्वय : (Prose Order)–** परिवर्तिनि संसारे को वा मृतो न जाय
स जातो येन जातेन वंशः समुन्नतिं याति ।।३२।।

**सरलसंस्कृतार्थ :–** धर्माधर्मवशात्यौनः पुन्येन विवर्तमाने जरामरणरूपसंसा
को वा न मृतः को वा न उत्पद्यते । सर्वोऽप्युत्पन्नो मृतश्च भवत्येवेत्यर्थः । वस्तु
तस्यैव जन्मग्रहणे साफल्यं येन स्वकुलस्योन्नतिः क्रियते ।।३२।।

**हिन्दी :–** इस नित्य परिवर्तनशील जरामरणरूपसंसारचक्र में कौन म
नहीं और कौन उत्पन्न नहीं होता है । वास्तव में उत्पन्न वही है जिसके उत्पन्न
से वंश की समुन्नति होती है ।।३२।।

**English Translation :–** Who does not die and is not reborn in this changeable world ? But he is really born by whose birth his family makes a progress. (32)

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य, शीर्यते वन एव वा ।। ३३ ।।

**अन्वय : (Prose Order)–** कुसुमस्तवकस्येव मनस्विनो द्वयी वृत्तिः ।
सर्वलोकस्य मूर्ध्नि वन एव वा शीर्यते ।।३३।।

**सरलसंस्कृतार्थ :–** स्वाभिमानवतः पुरुषस्य पुष्पगुच्छस्येव द्विविधा वृत्तिः भवति, यथा पुष्पगुच्छकः सर्वेषां जनानां शिरसि तिष्ठति अथवा वन एव जीर्यते । एवमेव मानिनोऽपि सर्वेषां जनानां मध्ये उन्नतस्थाने तिष्ठन्ति तदलाभे अरण्ये विजने वा प्राणान् त्यजन्ति ।।३३।।

**हिन्दी :–** फूल के गुच्छे की भाँति स्वाभिमानी पुरुषों की दो प्रकार की गति होती है, या तो वे मूर्धन्य स्थान पर रहते हैं या वन (एकान्त) में नष्ट हो जाते हैं ।।३३।।

**English Translation :–** As for a bunch of flowers, so there are only two courses for a self-respecting man, in this world, Either he should stand ahead of all others or should perish in the forest. (33)

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।
द्वावेव ग्रसते दिनेश्वर[1]निशाप्राणेश्वरौ भासुरौ[2]
भ्रातः! पर्वणि पश्य दानवपतिः शीर्षविशेषाकृतिः ।।३४।।

**अन्वय : (Prose Order)–** बृहस्पतिप्रभृतयः संभाविताः पञ्चषः अन्येऽपि सन्ति, विशेषविक्रमरुचीरेष राहुस्तान् प्रति न वैरायते। भ्रातः! पश्य, शीर्षविशेषीकृतः दानवपतिः पर्वणि भासुरौ दिनेश्वरनिशाप्राणेश्वरौ द्वावेव ग्रसते ॥३४॥

**सरलसंस्कृतार्थ :–** अम्बरे सूर्याचन्द्रमसौ विहाय बृहस्पत्यादयोऽन्येऽपि पञ्च वा षड्वा प्रसिद्धा ग्रहाः विद्योतन्ते। किन्तु तेजिष्ठैः सहैव कलहाचरणतत्परः सः स्वर्भानुः तान् प्रति वैरं न करोति। हे सखे! ज्ञानदृष्ट्या निभालय यत् शिरोमात्रावशिष्टगात्रः दानवपतिः तेजस्विनौ सूर्यचन्द्रमसावेव गिलति। मानशौर्यशालिनः निजाङ्गवैकल्यं न परिगणयन्ति किन्तु महत्कार्यमेव कर्तुं व्यवसन्तीति तात्पर्यम् ॥३४॥

**हिन्दी :–** आकाश में बृहस्पति आदि ५-६ और भी बड़े-बड़े ग्रह हैं परन्तु असाधारण पराक्रमरुचिसम्पन्न वह राहु उनसे वैर नहीं करता है। हे मित्र! देखो, शिर मात्र से बचा हुआ यह राक्षसों का राजा राहु चमकते हुए सूर्य और चन्द्र इन दो ग्रहों को ही ग्रसता है ॥३४॥

**English Translation–** There are in the sky five or six other important illuminaries. But this Rahu, who is fond of an extra ordinary valour, does not cherish an enmity against them. O brother! you look this lord of demons who is cut a head, and swallows two splendid gods i.e. the sun and the moon. (34)

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां,
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह! महतां निःसीमानश्चरित्रविभूतयः ।।३५।।

**अन्वय : (Prose Order)–** शेषः फणाफलकस्थितां भुवनश्रेणिं वहति। कमठपतिना स मध्येपृष्ठं सदा धार्यते। तमपि पयोधिः अनादरात् क्रोडाधीनं कुरुते। अहह महतां चरित्रविभूतयः निःसीमानः (भवन्ति) ॥३५॥

**सरलसंस्कृतार्थ :–** नागराज: पातालादिचतुर्दशविष्टपपङ्क्तिं फणपट्टे धारयति, तं शेषं आदिकूर्मेण स्वपृष्ठे निरन्तरं धार्यते। तं कमठपतिमपि समुद्र: लीलया अंकगतं कुरुते, महदाश्चर्यम् यत् मानशौर्यशालिनां महानुभावानां महात्म्यसम्पद: निर्मर्यादा: ॥३५॥

**हिन्दी :–** शेषनाग चतुर्दशभुवन पंक्ति को अपने फणरूपी पट्ट पर धारण करते हैं। उन शेषनाग को कूर्मराज सदा अपने पृष्ठ के मध्यभाग में धारण करते हैं और समुद्र उन कूर्मपति को भी सरलता से अपने अङ्क में धारण करते हैं। आश्चर्य है! महापुरुषों के चरित्रों का ऐश्वर्य अपार है॥३५॥

**English Translation :–** Shesha serpent bears the row of the worlds on the slab of his head. The king of tortoises carries him always. The sea supports the same king of tortoises in his lap. Oh the wealths of the characters of the great are in calculable ? (35)

**वरं पक्षच्छेद:[१] समदमघवन्मुक्तकुलिश-**
**प्रहारैरुद्गच्छद्बहलदहनोदगारगुरुभि: ।**
**तुषाराद्रे: सूनोरहह ! पितरि क्लेशविवशे**
**न चासौ सम्पात: पयसि पयसां पत्युरुचित: ॥३६॥**

**अन्वय : (Prose Order)–** उद्गच्छद्बहुलदहनोद्गारगुरुभि: समदमघवन्मुक्तकुलिशप्रहारै: तुषाराद्रे: सुनो: पक्षच्छेदो वरम्। अहह! पितिरि क्लेशविवशे पयसां पत्यु:पयसि चासौ सम्पातो न उचित: ॥३६॥

**सरलसंस्कृतार्थ :–** सदर्पेण देवेन्द्रेण प्रयुक्तै: प्रचण्डाग्निमुद्गिरद्भि: वज्रप्रहारै: मैनाकस्य पक्षच्छेद: वरमासीत् किन्तु पितरि हिमालये वज्रप्रहारजनितदु:खेन विह्वले सति तस्य निजप्राणसंरक्षणार्थं समुद्रे पलायनमुचितं नासीत्॥३६॥

**हिन्दी :–** दर्पान्वित इन्द्र के प्रचण्डाग्नि की ज्वालाओं को उगलने वाले वज्र प्रहारों से मैनाक के पक्षों का कट जाना उचित था किन्तु हिमालय के पुत्र मैनाक को यह उचित न था कि पिता के दु:ख से विवश हो जाने पर अपनी रक्षा के लिए समुद्र में गिरना॥३६॥

**English Translation :–** It would have been better if the wings of Mainaka, the son of the Himalayas, might have been cut off with the beats of the thunderbolts dealt in a mad rage, by Indra. These beats are very serious for the flashes of the immense fire. But it was not like him that he threw himself down in the waters of the Ocean when his father was overwhelmed by the trouble. (36)

**यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।**
**तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।३७।।**

**अन्वय : (Prose Order)–** सवितुः पादैः स्पृष्टोऽचेतनोऽपि इनकान्तः त् प्रज्वलति तत् तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।३७।।

**सरलसंस्कृतार्थ :–** अचेतनोऽपि सूर्यकान्तमणिः सूर्यस्य पादैः ताडितः सन् प्राज्वल्यमानः भवति अतो शौर्यसम्पन्नः पुरुषः शत्रुभिः विहितापकारं कथं क्षमते कदापि न सहते ।।३७।।

**हिन्दी :–** यदि अचेतन सूर्यकान्तमणि भी सूर्य के पद अर्थात् किरणों से ताडित होकर तेज उगलने लगता है तो मानशौर्यसम्पन्न पुरुष दूसरे के द्वारा किये गये तिरस्कार को कैसे सह सकता है ।।३७।।

**English Translation :–** When being touched with feet of the sun, the suryakanta (fire-glass) jewel burns, then how can a self respecting man bear an insult done by his enemy ? (37)

**सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।**
**प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो[1] हेतुः ।।३८।।**

**अन्वय : (Prose Order)–** सिंहः शिशुरपि मदमलिनकपोलभित्तिषु गजेषु निपतति, इयं सत्त्ववतां प्रकृतिः । वयस्तेजसो हेतुः न खलु ।।३८।।

**सरलसंस्कृतार्थ :–** सिंहशावकः मत्तमातङ्गेषु कुम्भस्थलविदारणार्थम् आक्रमणं करोति । बलाढ्यानामेष स्वभावः यत् ते शक्तिमन्तमेव धर्षयन्ति न तु निर्बलम् । अवस्था अनभिभवनीयतायाः कारणं नास्ति खलु ।।३८।।

**हिन्दी :–** सिंह शावक भी मद से मलिन कपोलस्थलवाले हाथियों पर ही आक्रमण करता है । यह बलवानों की प्रकृति ही है । निश्चित ही अवस्था तेज का कारण नहीं होती है ।।३८।।

**English Translation :–** Even the cub of a lion attacks the elephants whose wall-like temples are dirty with rut. Such is the nature of the self-respecting. Age is not the cause of valour. (38)

जातिर्यातु रसातलं गुणगणतस्तस्याप्यधो गच्छता-
च्छीलं शैलतटात्पतत्त्वभिजनः सन्दह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्त्वर्थोऽस्तु नः केवलं,
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ।।३९।।

**अन्वय : (Prose Order)–** जातिः रसातलं यातु, गुणगणः तस्यापि अधो गच्छतात्, शीलं शैलतटात् पततु, अभिजनो वह्निना सन्दह्यताम्, वैरिणि शौर्ये आशु वज्रं निपततु, नः केवलम् अर्थः अस्तु, एकेन येन विना इमे समस्ताः गुणाः तृणलवप्रायाः (सन्ति) ॥३९॥

**सरलसंस्कृतार्थ :–** ब्राह्मणत्वादिजातिः अधोलोकं गच्छतु, धैर्यौदार्यगाम्भीर्यादिगुणा अपि नश्यन्तु, सद्वृत्तमपि विशीर्णं भवतु, वंशः वह्निना भस्मीक्रियताम्, शत्रुभूते पराक्रमशालित्वे वज्रपातो भवतु, जातिकुलशीलशौर्यादिनाशेऽप्यस्माकं न किंचिदपि प्रयोजनम्। अस्माकं केवलं वित्तमेव संभवतु। येनैकेन धनेन विना इमे सर्वे गुणा तृणाग्रभागवन्निस्साराः सन्ति ॥३९॥

**हिन्दी :–** जाति रसातल में चली जाय, गुणों का समूह उससे भी नीचे चला जाय, सदाचार पर्वत से गिर जाय, वंश अग्नि से भस्म हो जाय, वैरी पराक्रम पर वज्रपात हो जाय। (हमे इससे क्या ?) हमारे पास केवल धन हो, (क्योंकि) केवल अकेले उस धन के विना ये समस्तगुण तिनके के समान हैं ॥३९॥

**English Translation :–** Let the nation go down, the several virtues may go deeper, let character fall down from the peak of a mountain and let country be burnt. Let thunderbolt quickly fall down upon inimical Valour. We want wealth only wealth-without which all the above mentioned qualities are as worthless as a straw. (39)

तानीन्द्रियाणि सकलानि, तदेव नाम,

सा बुद्धिरप्रतिहता, वचनं तदेव ।

अर्थोष्मणा विरहितः पुरुषः स एव,

त्वन्यः क्षणेन भवतीति विचित्रमेतत् ।।४०।।

**अन्वय : (Prose Order)–** तानि सकलानि इन्द्रियाणि, तदेव नाम, सा अप्रतिहता बुद्धिः, तदेव वचनम्, अर्थोष्मणा विरहितः सः एव पुरुषः क्षणेन तु अन्यो भवतील्येतद् विचित्रम् ।।४०।।

**सरलसंस्कृतार्थ :–** तान्येव समस्तानि चक्षुरादीनीन्द्रियाणि सन्ति, अभिधानमपि तदेवास्ति, सैव अकुण्ठिता बुद्धिरस्ति, वाणी अपि सैवास्ति, सर्वमिदं वस्तुजातं यादृशं सम्पत्तिसमय आसीत्तादृशमेवाधुनापि अस्ति, किन्तु धनस्योष्मणा विरहितः स एव धनाढ्यः पुरुषः निमेषमात्रेण अपर इव भवति । एतद् कुतुहलजनकम् ।।४०।।

**हिन्दी :–** वे ही सब इन्द्रियाँ हैं, वही नाम है, वही अकुण्ठित बुद्धि है, वही वचन है परन्तु यह विचित्र है कि धन की गर्मी निकल जाने से वही पुरुष क्षणभर में अन्य सा बन जाता है ।।४०।।

**English Translation :–** Same are the senses, same the action, the unfailing intellect is same and very same is the word. But it is wonder that one, when robbed of his wealth, becomes quite a differen man from what he used to be. (40)

यस्यास्ति वित्तं स नरः कुलीनः,

स पण्डितः, स श्रुतवान्गुणज्ञः ।

स एव वक्ता, स च दर्शनीयः,

सर्वे गुणाः काञ्चनमाश्रयन्ति ।।४१।।

**अन्वय : (Prose Order)–** यस्य वित्तमस्ति स नरः कुलीनः, स पण्डितः, स श्रुतवान् गुणज्ञः स एव वक्ता, स च दर्शनीयः सर्वे गुणाः काञ्चन-माश्रयन्ति ।।४१।।

**सरलसंस्कृतार्थ :–** यस्य जनस्य सविधे धनमस्ति स एव नरः महाकुलप्रसूतः, विद्वान्, गुणानुरागी, व्याख्याता, रमणीयाकृतिः चास्ति। यतो हि सर्वे गुणाः वित्तमाश्रयन्ति ।।४१।।

**हिन्दी :–** जिस व्यक्ति के पास धन है, वह नर कुलीन है, वह पण्डित, बहुश्रुत और गुणों को जानने वाला है। वह व्याख्याता और सुन्दर है, क्योंकि समस्त गुण स्वर्ण अर्थात् धन का ही आश्रय ग्रहण करते हैं ॥४१॥

**English Translation :–** He, who has got wealth is considered as one born in a respectable family. He is learned and well-advised. He is an orator and beautiful too. All the virtues appertain to gold. (41)

**दौर्मन्त्र्यान्नृपतिर्विनश्यति, यतिः सङ्गात्सुतो लालना-**
**द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।**
**ह्रीर्मद्यादनवेक्षणादपि कृषिः, स्नेहः प्रवासाश्रया-**
**न्मैत्री चाऽप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥४२॥**

**अन्वय : (Prose Order)–** नृपतिः दौर्मन्त्र्यात्, यतिः सङ्गात्, सुतः लालनात्, विप्रः अनध्ययनात्, कुलं कुतनयात्, शीलं खलोपासनात्, ह्रीः मद्यात्, कृषिः अपि अनवेक्षणात्, स्नेहः प्रवासात् मैत्री च अप्रणयात्, समृद्धिः अनयात्, धनं त्यागात्, प्रमादात् विनश्यति ॥४२॥

**सरलसंस्कृतार्थ :–** राजा दुष्टान्मंत्रात् दौर्मन्त्र्यात् वा नश्यति, मुनिः विषयेषु आसक्तेर्विनश्यति, ब्राह्मणः वेदशास्त्राध्ययनाभावान्नश्यति, वंशः दुष्टपुत्रान्नश्यति, सत्स्वभावः दुर्जनसमागमान्नश्यति, लज्जा मद्यपानान्नश्यति, सस्यमनवेक्षणान्नश्यति, स्नेहः प्रवासाश्रयणान्नश्यति, सख्यं प्रेमाभावान्नश्यति, नीतिं विहाय प्रचलनात् समृद्धिः नश्यति, एवञ्च धनमर्थिसात्करणात् प्रमादात् वा नश्यति ॥४२॥

**हिन्दी :–** नृपति दुष्टमन्त्र से अथवा दुष्टमंत्री से, यति विषयासक्ति से, पुत्र लाड़ से, वेदादि के न पढ़ने से ब्राह्मण, कुपुत्र से वंश, कुसंगति से सदाचार, देख-भाल के अभाव में खेती, परदेशगमन से प्रीति, अप्रणय से मैत्री नीति के अभाव में ऐश्वर्य तथा व्यर्थत्याग और प्रमाद से धन नष्ट हो जाता है ॥४२॥

**English Translation :–** A king is ruined by a wicked ministery an ascetic by an attachment to enjoyment, a son by over much love, a Brahman by not reading the vedas, a family by a bad son, character by association with the wicked, modesty by drinking, farming by neglect, to love by absence and friendship by ceasing affections, properity by adopting untoward tactics and wealth is rained by carelessness and by disposing it improperly. (42)

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति ।।४३।।**

**अन्वय : (Prose Order)–** वित्तस्य दानं, भोगः, नाशस्तिस्रो गतयो भवन्ति। यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।४३।।

**सरलसंस्कृतार्थ :–** धनस्य पात्रे विनियोग अनुभवः क्षयश्चति तिस्र एव गमनोपाया भवन्ति। यो जनः पात्राय न प्रयच्छति, नानुभवति तस्य वितस्य नाशरूपा तृतीया गतिर्भवति ।।४३।।

**हिन्दी :–** धन की दान, भोग और नाश ये तीन गतियाँ होती है। जो पुरुष न सत्पात्र को देता है और न भोग ही करता है उसके धन की तृतीय गति अर्थात् नाश ही होता है ।।४३।।

**English Translation :–** Of money, there are only three possible ends, charity, enjoyment and wasting. The third end is sure to meet wealth of one who neither gives nor enjoys it. (43)

**मणिः शाणोल्लीढः, समरविजयी हेतिनिहतः[१],**
**मदक्षीणो नागः, शरदि सरितः श्यानपुलिनाः।**
**कलाशेषश्चन्द्रः, सुरतमृदिता बालवनिता,**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ।।४४।।**

**अन्वय : (Prose Order)–** शाणोल्लीढः मणिः, समरविजयी हेतिनिहतः, मदक्षीणो नागः, शरदि श्यानपुलिनाः सरितः, कलाशेषश्चन्द्रः, सुरतमृदिता बालवनिता, अर्थिषु गलितविभवाः नृपाः च तनिम्ना शोभन्ते ।।४४।।

**सरलसंस्कृतार्थ :–** शाणसंघृष्टः मणिः, शस्त्रक्षतः समरविजयी, मदक्षीणः हस्ती, शरदर्तौ शुष्कपुलिनाः नद्यः, तन्मात्रावशिष्टः चन्द्रः, रतिरणे विह्वलीकृता बालवनिता, तथा च याचकेभ्यः प्रदानेन व्यपगतार्थसम्पदः जनाः तनुत्वेनैव शोभासम्पन्नाः भवन्ति ॥४४॥

**हिन्दी :–** शाण (सान) पर घर्षित मणि, हथियारों से आहत योद्धा, मद से हीन हाथी, शरद् ऋतु में सूखे तटों वाली नदियाँ, कलामात्रावशिष्ट चन्द्रमा, काम-क्रीडा में उपमर्दित बाला, और याचकों को धन दे देने के कारण सम्पत्तिरहित राजा-ये सब पदार्थ अपने ह्रास से ही शोभा प्राप्त करते हैं ॥४४॥

**English Translation :–** The following are pretty on account of their wear an tear :– (1) A diamond that has been rubbed on a whet-stone. (2) A warrior wounded with weapons. (3) An elephant weakened by his rut having gone out. (4) The rivers which have left their banks in the winter. (5) The last digit of the moon. (6) A young woman pressed hard against the breast during the time of sexual intercourse. The kings whose wealth has exhausted by being given to the needy. (44)

**परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये,**
**स पश्चात्सम्पूर्णः कलयति धरित्रीं तृणसमाम् ।**
**अतश्चानैकान्त्याद्[1] गुरुलघुतयाऽर्थेषु धनिना-**
**मवस्था वस्तूनि प्रथयति च, सङ्कोचयति च ॥४५॥**

**अन्वय : (Prose Order)–** परिक्षीणः कश्चिद्यवानां प्रसृतये स्पृहयति, पश्चात् सम्पूर्णः स धरित्रीं तृणसमां कलयति। अतश्चार्थेषु गुरुलघुतयानैकान्त्याद् धनिनामवस्था वस्तूनि प्रथयति संकोचयति च ॥४५॥

**सरलसंस्कृतार्थ :–** कश्चिद् पुमान् दैवाद्दरिद्रः सन् प्रसृतिमात्रयवान्गुरुतया-काङ्क्षते। किन्तु स एव प्रसृतये स्पृहयालुः जनः दैववशाद् धनसम्पन्नः सन् सकलां पृथिवीमेव तृणसमां मन्यते। अतोऽनावश्यकत्वात् अर्थाः स्वतो गुरवो लघवो वा न सन्ति। अपितु धनवतामवस्था एव वस्तूनि गुरूकरोति अल्पीकरोति च ॥४५॥

**हिन्दी :–** कोई निर्धन व्यक्ति एक अंजलि मात्र जौ की इच्छा करता है। और (तत्पश्चात्) वही दरिद्र धनपूर्ण होकर सम्पूर्ण संसार को ही तृण समान समझता है। इस हेतु धनमात्र में छोटापन अथवा कोई बडप्पन नहीं है। धनियों की अवस्था ही वस्तुओं को बडा और छोटा बनाती है ॥४५॥

**English Translation :– When poor, one longs for a handful of barely:– The same man in opulence counts** the earth as of no value. Therefore being high or low does not depend on wealth alone. The circumustances of the rich extend or limit things. (45)